Q9XZ5E

# डॉ. सर्वपल्लीराधाकृष्णन्



डॉ. राधाकृष्णन् महाभागः अस्माकं देशस्य द्वितीयो राष्ट्रपतिः आसीत्। तस्य जन्म तमिलनाडु राज्ये 1888 खीस्ताब्देः सितम्बर मासस्य पञ्चमदिनाङ्के अभवत्। तस्य पिता वीरस्वामीउय्या एकः शिक्षकः आसीत्। तस्य माता अत्यन्तं धर्मपरायणा आसीत्।

राधाकृष्णन् महोदयस्य प्रारम्भिकी शिक्षा स्वग्रामे एव अभवत्। आरम्भे सः पितुः संरक्षणे निर्देशने च विद्याभ्यासम् अकरोत् सः मद्रासस्य क्रिश्चियन कालेजनामकमहाविद्यालये उच्चशिक्षां गृहीतवान्। स तत्र एव 1911 ईसवीये स्नातकोत्तर (एम.ए.) परीक्षाम् उत्तीर्णवान्। तस्य मुख्यविषयः दर्शनशास्त्रम् आसीत्।

डॉ. राधाकृष्णन् महाभागः स्वभावेन शिक्षकः आसीत्। सः सुदीर्घकालं यावत् शिक्षणकार्यम् अकरोत्। सः शिक्षायाः उच्चपदानि अलङ्कृतवान्। सः 1921 तमे वर्षे कोलकाताविश्वविद्यालये दर्शनविषयस्य प्राध्यापकः आसीत्। राधाकृष्णन् महाशयः 1931 ईसवीये आन्ध्रविश्वविद्यालयस्य उपकुलपतेः पदम् अलङ्कृतवान्। ततः नववर्षाणि (1939–1948) यावत् तेन काशीहिन्दूविश्वविद्यालयस्य कुलपतिपदं सुशोभितम्। डॉ. राधाकृष्णन् सर्वकारेण उच्चशिक्षायोगस्य अध्यक्षपदे अपि नियुक्तः।

राजनीतिक्षेत्रे अपि राधाकृष्णन् महोदयस्य महत् योगदानम् आसीत्। 1950 तमे वर्षे रूसदेशे राजदूतस्य पदे तस्य नियुक्तिः जातः। सः 1952 ईसवीये भारतस्य उपराष्ट्रपतिः जातः, तत्पश्चात् तेन राष्ट्रपतेः पदम् अलङ्कृतम्।

राधाकृष्णन् महाभागः भारतीयदर्शनस्य पाश्चात्यदर्शनस्य च महान् पण्डितः आसीत्। सः दर्शनविषयस्य अनेकानि पुस्तकानि अरचयत्। दार्शनिकरूपेण तस्य ख्यातिः विदेशेषु अपि प्रसरिता।

इत्थं राधाकृष्णन् महोदयस्य अखिलं जीवनम् एका विशाला कर्मभूमिः। सः आदर्शशिक्षकः महान् शिक्षाविद्– राजनीतिपटुः, विख्यातो दार्शनिकः विशिष्टो देशभक्तः, चिन्तकश्च आसीत्। तस्य व्यक्तित्वस्य सर्वाधिकप्रशंसनीयं रूपं तस्य चतुर्दशवर्षाणां सेवां न हि कोऽपि कदापि विस्मरिष्यति। अद्यापि श्रीराधाकृष्णन् महाभागस्य जन्मदिवसम् अस्माकं कृतज्ञो देशः शिक्षकदिवसरूपेण आयोजयति। तदीयाम् असाधारणसेवां विशिष्टं व्यक्तित्वं च उपलक्ष्य भारत राष्ट्रेण सः भारतरत्नम् इति सर्वोच्चालङ्करेण सम्मानितः।

## शब्दार्थाः

धर्मपरायणा = धर्म में विश्वास करने वाली। सर्वकारेण = सरकार द्वारा। ख्यातिः = कीर्ति (प्रसिद्धि)। अखिलम् = सम्पूर्ण। प्रसरिता = फैली। कृतज्ञः = आभारी। गृहीतवान् = ग्रहण किया।

## अभ्यासप्रश्नाः

**(1) संस्कृत में उत्तर दीजिए –**

(क) अस्माकं देशस्य द्वितीयो राष्ट्रपतिः कः आसीत् ?

(ख) राधाकृष्णन् महोदयस्य माता कीदृशी आसीत् ?

(ग) डॉ. राधाकृष्णन् भारतस्य उपराष्ट्रपतिः कदा अभवत् ?

(घ) राधाकृष्णन् महाभागः भारत राष्ट्रेण केन पुरस्कारेण सम्मानितः ?

**(2) रिक्त स्थानों की पूर्ति कीजिए–**

(क) सः शिक्षायाः उच्च पदानि ..................।

(ख) ............. अपि राधाकृष्णन् महोदयस्य महद्योगदानम् आसीत्।

(ग) दार्शनिकरूपेण तस्य ...................विदेशेषु अपि प्रसृता।

**(3) संस्कृत में अनुवाद कीजिए–**

(क) डॉ० राधाकृष्णन् एक महान् पुरूष थे।

(ख) वे महान् दार्शनिक थे।

(ग) हम लोग उनका आदर करते हैं।

(घ) उन्होंने देश की सेवा की थी।

**(4) (क) निम्नलिखित पदों की सन्धि कर प्रकार लिखिए –**

माता+अत्यन्तम्　　विषयस्य+अनेकानि।

**(ख) निम्नलिखित पदों का सन्धि–विच्छेद कीजिए –**

सर्वाधिकम्, सर्वोच्च, सर्वोच्चालङ्करेण

**(5) निम्नलिखित पदों के लिंग और वचन बताइये –**

देशस्य, शिक्षकः, शिक्षायाः, पुस्तकानि, तेन।

QA7V72